# कनकधारास्तोत्रम्

अङ्गं हरेः पुलक भूषणमाश्रयन्ती । भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अङ्गीकृताखिल विभूतिरपाङ्गलीला । माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥ १ ॥

मुग्धा मुहुर्विदधती वदने मुरारेः । प्रेमत्रपाप्रणिहितानि गतागतानि ।
मालादृशोर्मधुकरीव महोत्पले या । सा मे श्रियं दिशतु सागरसम्भवायाः ॥ २ ॥

विश्वामरेन्द्र पदविभ्रमदानदक्षम् । आनन्द हेतुरधिकं मधुविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धम् । इन्दीवरोदर सहोदरमिन्दिरायाः ॥ ३ ॥

आमीलिताक्षमधिगम्य मुदा मुकुन्दम् । आनन्दकन्दमनिमेषमनङ्गतन्त्रम् ।
आकेकरस्थितकनीनिकपक्ष्मनेत्रम् । भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥ ४ ॥

बाह्वन्तरे मुरजितःश्रितकौस्तुभे या । हारावळीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला । कल्याणमावहतु मे कमलालयायाः ॥ ५ ॥

कालाम्बुदाळि ललितोरसि कैटभारेः । धाराधरे स्फुरति या तडिदङ्गनेव ।
मातुस्समस्तजगतां महनीय मूर्तिः । भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ ६ ॥

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात् । माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं । मन्दालसं च मकराकर कन्यकायाः ॥ ७ ॥

दद्याद्-दयानुपवनो द्रविणाम्बुधाराम्। अस्मिन्नकिञ्चन विहङ्गशिशौ विषण्णे।
दुष्कर्मघर्ममपनीय चिराय दूरम्। नारायणप्रणयिनी नयनाम्बुवाहः ॥ ८ ॥

इष्टा विशिष्टमतयोऽपि नरा यया द्राक्। दृष्टा स्त्रिविष्टपपदं सुलभं भजन्ते।
दृष्टिः प्रहृष्टकमलोदर दीप्तिरिष्टाम्। पुष्टिं कृषीष्ट मम पुष्कर विष्टरायाः ॥ ९ ॥

गीर्देवतेति गरुडध्वजसुन्दरीति। शाकम्बरीति शशिशेखरवल्लभेति।
सृष्टिस्थितिप्रलय केळिषु संस्थितायै। तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै ॥ १० ॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै। रत्यै नमोऽस्तु रमणीय गुणार्णवायै।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै। पुष्ट्यै नमोऽस्तु पुरुषोत्तम वल्लभायै ॥ ११ ॥

नमोऽस्तु नाळीक निभाननायै। नमोऽस्तु दुग्धोदधि जन्मभूम्यै।
नमोऽस्तु सोमामृत सोदरायै। नमोऽस्तु नारायण वल्लभायै ॥ १२ ॥

नमोऽस्तु हेमाम्भुजपीठिकायै। नमोऽस्तु भूमण्डलनायिकायै।
नमोऽस्तु देवादि दयापरायै। नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ १३ ॥

नमोऽस्तु देव्यै भृगुनन्दनायै। नमोऽस्तु विष्णोरुरसिस्थितायै।
नमोऽस्तु लक्ष्म्यैकमलालयायै। नमोऽस्तु दामोदर वल्लभायै ॥ १४ ॥

नमोऽस्तु कान्त्यै कमलेक्षणायै। नमोऽस्तु भूत्यै भुवन प्रसूत्यै।
नमोऽस्तु देवादिभिरर्चितायै। नमोऽस्तु नन्दात्मज वल्लभायै ॥ १५ ॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि । साम्राज्यदान निरतानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिताहरणोद्यतानि । मामेव मातरनिशं कलयन्तु मान्ये ॥ १६ ॥

यत्कटाक्ष समुपासनाविधिः । सेवकस्य सकलार्थसम्पदः ।
सन्तनोति वचनाङ्गमानसैः । त्वां मुरारिहृदयीश्वरीं भजे ॥ १७ ॥

सरसिजनिलये सरोजहस्ते । धवलतमांशुकगन्धमाल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे । त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १८ ॥

दिग्गस्तिभिः कनककुम्भमुखावसृष्ट । स्ववर्हिनी विमलचारुजलप्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेष- लोकादिनाथ गृहिणी ममृताब्धि पुत्रीम् ॥ १९ ॥

कमले कमलाक्षवल्लभे त्वं । करुणापूर-तरङ्गितै-रपाङ्गैः ।
अवलोकय मामकिञ्चनानां । प्रथमं पात्रमकृत्रिमन्दयायाः ॥ २० ॥

स्तुवन्ति ते स्तुतिभिरमूभिरन्वहं । त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतर भाग्य भाजिनो । भवन्ति ते भुवि बुधभाविताशयाः ॥ २१ ॥